## ३५. पदकथनक्रीडा

लोट्

आचार्या - भोः छात्राः ! अत्र, आगच्छत। मण्डलाकारेण उपविशत। क्रीडां क्रीडाम।

छात्राः - शीघ्रं शीघ्रम् आगच्छन्तु। अधिकसमयं यावत् क्रीडाम।

आचार्या - रमे ! त्वं पङ्क्तौ उपविश। भीम ! अग्रे आगच्छ। युवां किञ्चित् अपसरतम्।

प्रतीक्षा - आर्ये अहं कुत्र उपविशामि ?

आचार्या - त्वं किमर्थं विलम्बं करोषि ? शीघ्रं हेमलतायाः पार्श्वे उपविश।

सुहासः - आर्ये का क्रीडा ? कः नियमः ?

आचार्या - शृण्वन्तु, अहम् एकं शब्दं वदामि। तस्य शब्दस्य प्रत्यक्षरं शब्दः वक्तव्यः। उक्तं शब्दं पुनः मा वदन्तु। ज्ञातं खलु ?

रवीन्द्रः - क्रीडायाः नाम वदतु आर्ये।

आचार्या - क्रीडायाः नाम 'प्रत्यक्षरपदकथनम्'। 'गिरिजावल्लभः' इति शब्दः। वदतु प्रदीप। 'गि' इति प्रथमाक्षरम्।

प्रदीपः - राकेशः प्रथमं वदतु। ततः आरम्भः भवतु आर्ये।

आचार्या - भवतु, राकेश ! वद त्वं शीघ्रम्।

राकेशः - गिरिः

चन्द्रः - रिपुः

स्नेहा - जानकी.....।

प्रदीपः - वस्त्रम्।

सुजाता - लाभः।

राकेशः - भल्लुकः।

आचार्या - इदानीम् अवगतवन्तः खलु। प्रदीप एकं शब्दं वदतु। तस्य शब्दस्य प्रत्यक्षरं एकः शब्दः इति सर्वे वदन्तु क्रीडन्तु। अहमिदानीमेव आगच्छामि।